ॐ श्री रामजयम्

## मङ्गल श्लोका:

स्वस्ति प्रजाभ्य: परिपालयन्तां न्याय्येन मार्गेण महीं महीशा: |

गोब्राह्मणेभ्य: शुभमस्तु नित्यं लोका: समस्ता: सुखिनो भवन्तु || १ ||



काले वर्षतु पर्जन्य: पृथिवी सस्यशालिनी |

देशोऽयं क्षोभरहितो ब्राह्मणा: सन्तु निर्भया: || २ ||

अपुत्रा: पुत्रिण: सन्तु पुत्रिण: सन्तु पौत्रिण: |

अधना: सधना: सन्तु जीवन्तु शरदां शतम् || ३ ||

चरितं रघुनाथस्य शतकोटि प्रविस्तरम् |

एकैकमक्षरं प्रोक्तं महापातकनाशनम् || ४ ||

श्रृण्वन् रामायणं भक्त्या य: पादं पदमेव वा |

स याति ब्रह्मण: स्थानं ब्रह्मणा पूज्यते सदा || ५ ||



रामाय रामभद्राय रामचन्द्राय वेधसे |


रघुनाथाय नाथाय सीताया: पतये नम: || ६ ||

यन्मङ्गलं सहस्राक्षे सर्वदेव नमस्कृते |

वृत्रनाशे समभवत् तत्ते भवतु मङ्गलम् || ७ ||

यन्मङ्गलं सुपर्णस्य विनताकल्पयत् पुरा |

अमृतं प्रार्थयानस्य  तत्ते भवतु मङ्गलम् || ८ ||





मङ्गलम् कोसलेन्द्राय महनीयगुणात्मने |

चक्रवर्ति तनूजाय सार्वभौमाय मङ्गलम् || ९ ||

अमृतोत्पादने दैत्यान् घ्नतो वज्रधरस्य यत् |

अदितिर्मङ्गलं प्रादात् तत्ते भवतु मङ्गलम् || १० ||



त्रीन् विक्रमान् प्रक्रमतो विष्णोरमिततेजस: |

यदासीन्मङ्गलं राम तत्ते भवतु मङ्गलम् || ११ ||

ऋषय: सागरा द्वीपा वेदा लोका दिशश्च ते | (ऋतव:)

मङ्गलानि महाबाहो दिशन्तु तव सर्वदा || १२ ||



कायेन वाचा मनसेन्द्रियेर्वा बुद्ध्याऽऽत्मना वा प्रकृते: स्वभावात् |

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ||

जानकी कान्त स्मरणं     जय जय राम राम ||